वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

# ‘तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये’: श्रीमद्भदवद्गीतायाः अष्टमाध्यायान्तर्गतानां ‘पदम्’, ‘धाम’, ‘स्थानम्’ च शब्दानां विवेचनम्

आचार्यः रावलः जिग्नेशः[१]

## प्रस्तावना

श्रीमद्भगवद्गीता, भारतीयदर्शनपरम्परायामेको महत्त्वपूर्णोऽपि च लोकप्रियो ग्रन्थः। श्रीमद्भगवद्गीता तत्त्वमीमांसा, कर्ममीमांसा, भक्तिमीमांसा, मुक्तिमीमांसा चेत्यादीन् अत्यन्ताऽऽवश्यकदार्शनिकसिद्धान्तान् सम्यग्रूपेण निरूपयति। भारतीयदर्शनपरम्पराया इतिहासे बहुभिराचार्यैः श्रीमद्भगवद्गीताया आधारेण अद्वैतम्, द्वैतम्, विशिष्टाद्वैतम् इत्यादिसिद्धान्ताः प्रस्फुटीकृताः। तथैव आधुनिकविद्वज्जनैः श्रीमद्भगवद्गीतातः कर्मयोगः, भक्तियोगः, ज्ञानयोगः इत्यादिप्रमुखविषयाः विवर्णिताः। एवं हि विभिन्नव्याख्यानैः अस्माभिः ज्ञायते यद् व्याख्याकारः स्वाभिप्रायेण निजज्ञानेन च ग्रन्थस्य गतिं स्वमनोनिष्ठायां दिशि परिवोढुं समर्थः। एष्वसङ्ख्यव्याख्यानेषु को व्याख्यानो मूलग्रन्थसिद्धान्तसम्मतः? एतद् निर्णीतुं ग्रन्थस्य मूलभूतानाम् अंशानाम् आन्तर्ग्रन्थीयपरिशीलनं कर्तव्यम्। शोधपत्रेऽस्मिन् श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्थितानां पद-धाम-स्थानेति शब्दत्रयाणामुपरि विविधानां भाष्याणां शास्त्रानुशीलपद्धत्या तुलनात्मकम् अध्ययनं क्रियते। प्राप्तभाष्येषु अत्र प्रमुखरूपेण शङ्कराचार्यकृताऽद्वैतभाष्यं[२]

---

[१] PhD Student, Saurashtra University, Rajkot, Address: BAPS Swaminarayan Sanskrit Mahavidyalaya, BAPS Swaminarayan Mandir, Sarangpur, Email: - jigneshravalrj@gmail.com, (M) +91 972 5205 602

[२] शाङ्करभाष्यस्य सर्वाणि उद्धरणानि श्रीहरिकृष्ण गोयंदका, श्रीमद्भगवद्गीता (शाङ्करभाष्य हिन्दी-अनुवादसहिता,२०१७) ग्रन्थतः नीतानि।

रामानुजाचार्यप्रणीतविशिष्टाद्वैतभाष्यं[३] साधुभद्रेशदासविरचितस्वामिनारायणभाष्यं[४] चेति त्रीणि भाष्याणि स्वीकृतानि।

शोधपत्रेऽस्मिन् प्रथमं पद-धाम-स्थानेति शब्दत्रयाणां पूर्वकथितभाष्येषु यद् विवेचनं कृतं तदेव लिख्यते। ततः श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्थितमूलश्लोकानाम्[५] आन्तर्ग्रन्थीयानुशीलनं करिष्ये। अन्तिमचरणे पद-धाम-स्थानेति शब्दत्रयाणाम् आन्तर्ग्रन्थीयानुशीलनं तथा चोक्तेषु भाष्येषु एतेषां शब्दानां यदर्थ: कृतः तेषां समालोचनात्मकानुशीलनं कृत्वा मूलग्रन्थविचारैः सह तद्भाष्यणां सुसङ्गतिम् अधिष्यामहे।

## विभागः १- पद-धाम-स्थानेति शब्दत्रयाणां विविधभाष्याणि

पद-धाम-स्थानेति प्रत्येकशब्दाः अष्टमाऽध्याये केवलम् एकवारमेव प्रयुक्ताः। सर्वप्रथमं पदेति शब्दस्योल्लेखः अष्टमाध्यायस्यैकादशे श्लोके प्राप्तः- **'यदक्षरं वेदविदो... तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये।'** ततो धामशब्दः एकोत्तरविंशतितमे श्लोके प्रयुक्तः **'अव्यक्तोऽक्षर...तद् धाम परमं मम।'** अन्ते च स्थानेति शब्दः अध्यायस्यान्तिमे श्लोके गुम्फितः **'वेदेषु यज्ञेषु...योगी परं स्थानम्-उपैति चाद्यम्।'** इति।

अथैतच्छब्दत्रयाणाम् उक्तभाष्यत्रयकृतार्थाः तालिकारूपेण प्रदर्शिताः।

| **शब्दः** | **भाष्यम्** | **अर्थः** |
|---|---|---|
| **पदम्** | **शाङ्करभाष्यम्** | तद् अक्षराख्यं पदम्[६] |
| (८/११) | **रामानुजभाष्यम्** | पद्यते गम्यते अनेन इति पदं तद् निखिलवेदान्तवेद्यं **मत्स्वरूपम्** अक्षरम्[७] |

[३] रामानुजभाष्यस्य सर्वाणि उद्धरणानि आदि देवानन्दस्वामी, श्रीरामानुजभाष्यतः नीतानि।

[४] स्वामिनारायणभाष्यस्य सर्वाणि उद्धरणानि स्वामी भद्रेशदासः, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, (२०१२) ग्रन्थतः नीतानि।

[५] गीतायाः मूलश्लोकानां सन्दर्भाः स्वामिनारायणभाष्यतो नीताः।

[६] शाङ्करभाष्यम्, पृ.२१६

| | | |
|---|---|---|
| | **स्वामिनारायणभाष्यम्** | पद्यते गम्यते ब्रह्मरूपैः प्रत्यक्षपरमात्मोपासकैः स्वदेहपातोत्तरम् अर्चिरादिपथेन प्राप्यते इति पदम्। गन्तव्यस्थानभूतं परमात्मनित्यनिवासभूतं देशविशेषात्मकम् **अक्षरधामब्रह्मलोकादिशब्दव्यपदिष्टं** पदम् इत्यर्थः।[८] |
| **धाम** (८/२१) | **शाङ्करभाष्यम्** | स्थानम्[९] |
| | **रामानुजभाष्यम्** | परमं नियमनस्थानम्। अचेतनप्रकृतिः एकं नियमनस्थानम्, तत्संसृष्टरूपा जीवप्रकृतिः द्वितीयं नियमनस्थानम्, अचित्संसर्गवियुक्तं स्वरूपेणावस्थितं मुक्तस्वरूपं परमं नियमनस्थानम् इत्यर्थः। तत् च अपुनरावृत्तिरूपम्। अथवा प्रकाशवाची धामशब्दः, प्रकाशः च इह ज्ञानम् अभिप्रेतं प्रकृतिसंसृष्टात् परिच्छिन्नज्ञानरूपाद् आत्मनः अपरिच्छिन्नज्ञानरूपतया **मुक्तस्वरूपं** परं धाम।[१०] |
| | **स्वामिनारायणभाष्यम्** | निवासस्थानम्[११] |
| **स्थानम्** (८/२८) | **शाङ्करभाष्यम्** | - |
| | **रामानुजभाष्यम्** | - |
| | **स्वामिनारायणभाष्यम्** | 'तत्ते पदं संग्रहेण प्रवक्ष्ये' (गी.८/११), 'ततः पदं तत्परिमार्गितव्यम्' (गी.१५/४) इत्यादौ पदशब्देन व्यपदिष्टं परमात्मनिलयभूतम् **अक्षरधामाख्यं** देशविशेषम्।[१२] |

[७] रामानुजभाष्यम्, पृ.२७८

[८] स्वामिनारायणभाष्यम्, पृ.१८४

[९] शाङ्करभाष्यम्, पृ.२२२

[१०] रामानुजभाष्यम्, पृ.२८५

[११] स्वामिनारायणभाष्यम्, पृ.१८९

## विभागः २– अष्टमाध्यायस्थितश्लोकानाम् आन्तर्ग्रन्थीयानुशीलनम्

पूर्वे अस्माभिः पदधामस्थानेति शब्दत्रयाणामुपरि प्राप्तभाष्यमवलोकितम् । इतः परं वयं स्वयं श्रीमद्भगवद्गीता एतान् त्रीन् शब्दान् केन सन्दर्भेण प्रयुज्यते तस्मिन् विषये विहङ्गावलोकनं करिष्यामहे ।

### पदशब्दः

पदशब्दः ८/११ श्लोके प्रयुक्तः- **'यदक्षरं...तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये।'** श्लोकेऽस्मिन् 'यद् अक्षरम्' इत्यस्य अन्वयः 'तत् पदम् ' इत्येतेन सह जायते, अर्थाद् यं वेदज्ञैः अक्षरमित्युच्यते तदेव पदम्। इत्यनेन अक्षरमेव पदम् इति सिद्धम्। अथ अक्षरमिति शब्दस्य विचारः क्रियते चेत् श्रीकृष्णेन अष्टमाऽध्यायस्य आदा एव ब्रह्मेति शब्दस्य समानार्थरूपेण अक्षरशब्दः प्रदर्शितः। यदा पार्थः पप्रच्छ **'किं तद् ब्रह्म?'**[१३] तदा पार्थसारथिः प्रत्युत्ततार **'अक्षरं ब्रह्म परमम्'**[१४] इति। इत्यनेन सिध्यते यद् ब्रह्मशब्दः अक्षरशब्दस्य पर्यायवाची। अतः गीतायाः मूलश्लोकानां समन्वयेन निष्कृष्यते यत् पदशब्दः अक्षर-ब्रह्मशब्दयोः समानार्थीति ।

### धामशब्दः

धामशब्दः ८/२१ श्लोके गुम्फितः **'अव्यक्तोऽक्षर... तद्धाम परमं मम।'** अत्र वासुदेवेनोक्तं 'यद् अव्यक्तशब्देन कथितम् अक्षरं तदेव मे धामेति'। श्लोकेऽस्मिन्नपि अक्षरशब्दः धामशब्दस्य विशेषणम्। पूर्वोक्तरीत्या ब्रह्मशब्दः अक्षरशब्दस्य समानार्थी, अतः गीतायाः मूलश्लोकानां समन्वयेन धामशब्दः अक्षरशब्दः ब्रह्मशब्दः पदशब्दश्चैते सर्वे पर्यायवाचिनः।

### स्थानशब्दः

स्थानशब्दः अष्टमाध्यायस्य अन्तिमश्लोके विलसितः **'वेदेषु यज्ञेषु...योगी परं स्थानम्-उपैति चाद्यम्।'** प्रस्तुतश्लोके श्रीकृष्णेन कथितं, 'यो योगी सर्वं तत्त्वतः जानाति, सः परमं स्थानं प्राप्नोति'।

---

[१२] स्वामिनारायणभाष्यम्, पृ.१९८

[१३] गीता ८/१

[१४] गीता ८/३

श्लोकेऽस्मिन् श्रीकृष्णः स्थानशब्दस्याऽग्रे परमेति विशेषणं प्रयुक्तवान्। इदमेव विशेषणं तेन ८/२१तमे श्लोकेऽपि प्रयुक्तः 'तद् धाम **परमं** मम', इदमुक्त्वा परमगन्तव्यस्थानरूपेण श्रीकृष्णेन स्वं धाम उद्देशितम्। अतः 'परं' 'परमम्' इति विशेषणाभ्याम् इदमेव विज्ञायते यत् 'परं धाम' तदेव 'परमं स्थानम्'। इत्यनेन धाम स्थानं चेति द्वौ शब्दौ एकार्थवाचिनौ। पूर्वे धामशब्दस्य निरूपणे एव अस्माभिः दृष्टं यद् 'धाम' तदेव 'पदम्' अर्थात् 'पदं', 'धाम', 'स्थानं' वेति त्रयः शब्दाः किञ्चिद् एकं गन्तव्यं स्थानं निर्दिशन्ति। अतः श्रीकृष्णः अत्र एकं निश्चितगन्तव्यस्थानविशेषं निर्दिशति इति वक्तुं शक्यते।

अतः अस्याऽष्टमाध्यायस्य श्लोकानाम् अनुशीलनं कृत्वा ज्ञायते यद् ब्रह्माऽक्षरपदधामस्थानेति सर्वे शब्दाः निश्चयेन किञ्चिद् एकमेव तत्त्वमङ्गुलीनिर्देशङ्कुर्वते। तात्पर्यार्थतः सर्वे शब्दाः एकस्मिन् प्रकरणे एकदेशिनः अतः सर्वे शब्दाः समानार्थगामिनः एव भवेयुः।

अत्र शब्दत्रयाणाम् अर्थपरीक्षणात् प्राक्प्रकृतचर्चाऽऽनुषङ्गिकं ब्रह्मशब्दाक्षरशब्दयोः विवेचनमपि अनिवार्यम्। प्रथमं ब्रह्माक्षरशब्दयोः अष्टमाध्याये कतिवारं प्रयोगः कृतोऽपि च तयोः शब्दयोः श्रीशङ्कराचार्य: श्रीरामानुजाचार्यः श्रीभद्रेशदासश्च कम् अर्थं निरूपयन्ति तज्ज्ञात्वा सर्वशब्दान् तेषां च भाष्यं समालोचयिष्यामहे।

### ब्रह्मशब्दः

ब्रह्मशब्दः अखिलाष्टमाऽध्याये षड्वारं निर्दिष्टः।

**८/१ - किं तद् ब्रह्म**

**८/३ - अक्षरं ब्रह्म परमम्**

**८/११ - यदिच्छन्तो ब्रह्मचर्यं चरन्ति**

**८/१३ - ओमित्येकाक्षरं ब्रह्म**

**एवं ८/२४ - ब्रह्म ब्रह्मविदो जनाः**

तथा च अक्षरशब्दः अखिलाष्टमाऽध्याये चतुर्वारं प्रयुक्तः।

**८/३- अक्षरं ब्रह्म परमम्**

**८/११ – यद्-अक्षरं वेदविदो वदन्ति**

**८/१३ - ओमित्येकाक्षरं ब्रह्म**

एवं **८/२१ - अव्यक्तोऽक्षर इत्युक्त:**

अथ द्वयोरपि अक्षरब्रह्मशब्दयोः भाष्यत्रयमधिकृत्य विवेचनं द्रक्ष्यामः।

| शब्द | श्लोक क्रमांक | भाष्य | अर्थ |
|---|---|---|---|
| ब्रह्म | ८/१ | **शाङ्करभाष्यम्** | - |
| | | **रामानुजभाष्यम्** | - |
| | | **स्वामिनारायणभाष्यम्** | (पूर्वं) भूयो भूय: ब्रह्मशब्दमाकर्ण्य यथोपदेशं तस्य **जीवेश्वरप्रकृतिपरमात्मेतराऽभिधायित्वम्** आपाततोऽनुमाय ब्रह्मशब्दवाच्यत्वे संशयितस्तन्निश्चयाय पप्रच्छ किं तद् ब्रह्मेति[१५] |
| | ८/३ | **शाङ्करभाष्यम्** | **परस्य ब्रह्मण:**[१६] |
| | | **रामानुजभाष्यम्** | **परमम् अक्षरम्**[१७] |
| | | **स्वामिनारायणभाष्यम्** | 'बृह बृहि वृद्धौ' (पा.धा.पा.७३५,७३६) इति पाणिनीयधातुपाठबलाद् वृद्ध्यर्थे व्युत्पादयते ब्रह्मशब्द:। तथा च बृंहति बर्हति वेति ब्रह्म। एवं स्वरूपत: स्वभावतो गुणतश्च बृहत्त्वाद् बृहणत्वाच्च ब्रह्मशब्दोयम् अक्षरं ब्रह्माभिधत्ते। बृहत्त्वमुत्कर्ष:। तस्य च कस्मादिति अनुयोगिसापेक्षत्वात् परमात्मातिरिक्तसर्वजीवेश्वरमायाऽक्षरमुक्तेभ्योऽतिशयोत्कर्षविशिष्टम् **अक्षरं ब्रह्म** इति ब्रह्मशब्दार्थ:।[१८] |

[१५] स्वामिनारायणभाष्यम्, पृ.१७२

[१६] शाङ्करभाष्यम्, पृ.२१२

[१७] रामानुजभाष्यम्, पृ.२७१

[१८] स्वामिनारायणभाष्यम्, पृ.१७५

| | | | |
|---|---|---|---|
| | ८/११ | **शाङ्करभाष्यम्** | - |
| | | **रामानुजभाष्यम्** | - |
| | | **स्वामिनारायणभाष्यम्** | **ब्रह्मणि चर्या** एव ब्रह्मचर्यम्। साक्षाद्-ब्रह्मस्वरूपगुरुप्रसङ्गादिभिस्तेन सह आत्मगृहीत्या च स्वयमपि ब्रह्माहम् अहमअक्षरम् इत्यादिरूपेण अनवरतं परमात्मोपासनानुकूलस्वात्मब्रह्मरूपत्वाऽनुकूलाऽनुशीलनलक्षण: चर्यात्मको व्याहारो ब्रह्मचर्यम् इति।[१९] |
| **ब्रह्म** | ८/१३ | **शाङ्करभाष्यम्** | **ब्रह्मण:**[२०] |
| | | **रामानुजभाष्यम्** | **मद्वाचकम्**[२१] (इत्युक्ते परमात्मवाचकम्) |
| | | **स्वामिनारायणभाष्यम्** | 'ॐ इत्येतद्। एतद्ध्येवाक्षरं ब्रह्म' (कठ.२/१५,१६) इत्यादिश्रुतिप्रसिद्धं **प्रणववाच्याऽक्षरं** ब्रह्म[२२] |
| | ८/२४ | **शाङ्करभाष्यम्** | - |
| | | **रामानुजभाष्यम्** | - |
| | | **स्वामिनारायणभाष्यम्** | अपुनरावृत्तिकरं **ब्रह्माख्यं लोकमक्षरधामेति**यावद्'[२३] |
| | | **अक्षर** | |
| **अक्षर** | ८/३ | **शाङ्करभाष्यम्** | न क्षरति इति **परमात्मा**[२४] |
| | | **रामानुजभाष्यम्** | प्रकृतिविनिर्मुक्तात्मस्वरूपम्[२५] |
| | | **स्वामिनारायणभाष्यम्** | अक्षरम् एव ब्रह्मतत्त्वम् उच्यते इत्यर्थ:। तथा हि अक्षरमितिपदेन अत्र ब्रह्म व्याख्यातम्।[२६] (अक्षरशब्देन जीवेश्वरमुक्तपरब्रह्मभिन्नं ब्रह्मतत्त्वम्) |

[१९] स्वामिनारायणभाष्यम्, पृ.१८४

[२०] शाङ्करभाष्यम्, पृ.२१८

[२१] रामानुजभाष्यम्, पृ.२७८

[२२] स्वामिनारायणभाष्यम्, पृ.१८५

[२३] स्वामिनारायणभाष्यम्, पृ.१९५

[२४] शाङ्करभाष्यम्, पृ.२११

[२५] रामानुजभाष्यम्, पृ.२७१

| | | | |
|---|---|---|---|
| | ८/११ | शाङ्करभाष्यम् | न क्षरति इति अक्षरम् **अविनाशि**[२७] |
| | | रामानुजभाष्यम् | **अस्थूलत्वादिगुणकम्**[२८] **(परमात्मस्वरूपम्)** |
| | | स्वामिनारायणभाष्यम् | **अक्षरब्रह्मतत्त्वम्**[२९] |
| | ८/१३ | शाङ्करभाष्यम् | - |
| | | रामानुजभाष्यम् | हृदयकमलनिविष्टे **मयि अक्षरे**[३०] |
| | | स्वामिनारायणभाष्यम् | 'ॐ इत्येतद्। एतद्ध्येवाक्षरं ब्रह्म' (कठ.२/१५,१६) इत्यादिश्रुतिप्रसिद्धं प्रणववाच्याऽक्षरं **ब्रह्म**[३१] |
| | ८/२१ | शाङ्करभाष्यम् | अक्षरसञ्कम् **अव्यक्तभावम्**[३२] |
| | | रामानुजभाष्यम् | प्रकृतिसंसर्गवियुक्तस्वरूपेण अवस्थित **आत्मा**[३३] |
| | | स्वामिनारायणभाष्यम् | कालत्रयेऽपि क्षरणशून्योऽभियुक्तैः वेदविद्भिः **अक्षर** इति संकीर्तितः[३४] |

प्राङ्निर्दिष्टतालिकायाः सारांशरूपेण द्रक्ष्यामश्चेद ब्रह्मशब्दस्यार्थः अद्वैतभाष्ये परब्रह्मवाची तथा अक्षरशब्दस्य अर्थः क्वचित् परमात्मवाची क्वचिच्च अव्यक्तभाववाची निरूपितः।

विशिष्टाद्वैतभाष्ये ब्रह्मशब्दस्य अर्थः परब्रह्मवाची परमाक्षरवाची च तथा च अक्षरशब्दस्य अर्थः क्वचिद् मुक्तात्मवाचकः क्वचित् परमात्मावाचकश्चेति। स्वामिनारायणभाष्ये सर्वत्र ब्रह्माअक्षरशब्दौ पर्यायरूपेण प्रस्तूय अक्षरब्रह्मतत्त्वरूपार्थः कृतः।

---

[२६] स्वामिनारायणभाष्यम्, पृ.१७३

[२७] शाङ्करभाष्यम्, पृ.२१६

[२८] रामानुजभाष्यम्, पृ.२७८

[२९] स्वामिनारायणभाष्यम्, पृ.१८२

[३०] रामानुजभाष्यम्, पृ.२७८

[३१] स्वामिनारायणभाष्यम्, पृ.१८५

[३२] शाङ्करभाष्यम्, पृ.२२२

[३३] रामानुजभाष्यम्, पृ.२८५

[३४] स्वामिनारायणभाष्यम्, पृ.१८९

अस्माभिरवलोकितं यद् गीतायाः मूलभूतश्लोकानाम् आन्तर्ग्रन्थीयानुशीलनं कृत्वा इदमेव निष्कर्ष्टुं शक्यते यत् पदधामस्थानब्रह्माक्षरेति पञ्च शब्दा एकार्थगामिन एव। एते सर्वे एकदेशविशेषं निर्दिशन्ति। अथ पूर्वोक्तानां सर्वेषां भाष्याणाम् उपरि संचिन्त्य ते सर्वे शब्दाः तद्दिशि एव निर्दिशन्ति न वेतद् विचारयामः।

## अद्वैतभाष्यम्

अद्वैतभाष्यानुसारेण पदधामशब्दौ देशविशेषौ किन्तु स्थानशब्दस्य विशेषनिरूपणं न दृश्यते। ब्रह्म अक्षरं च द्वौ शब्दौ परमात्मवाचिनाविति। भाष्येऽस्मिन् प्राप्यगन्तव्यस्थानस्य निरूपणं नास्ति अतः शब्दार्थे विभिन्नता दृश्यते।

## विशिष्टाद्वैतभाष्यम्

विशिष्टाद्वैतभाष्यानुसारेण पदब्रह्मेतिशब्दौ परमात्मावाचिनौ अपि च धामाक्षरौ मुक्तात्मवाचिनौ। अक्षरशब्दस्य ८/११ श्लोके परमात्मार्थोऽपि प्राप्तः। भाष्येऽस्मिन्नपि स्थानशब्दस्य न किमपि अन्यद् विवेचनम्। एतद्दर्शनस्य परं धाम वैकुण्ठम्[३५] किन्तु तस्यापि किमपि निश्चितनिरूपणं न दृश्यते।

## स्वामिनारायणभाष्यम्

स्वामिनारायणभाष्यानुसारेण पदधामस्थानब्रह्माक्षरेति पञ्चशब्दाः अक्षरब्रह्मवाचिन एव। दर्शनेऽस्मिन् अक्षरधाम[३६] परं गन्तव्यस्थानम्।

## उपसंहारः

[३५] '... वैकुण्ठं मन्दिरत्वेन स्वीकृतवान् कुंभनर्त्तकः स्वामी।८।६।५।' सहस्रगीतिः, पृ. २०७
'वैकुण्ठप्रवेशसमये द्वारदेशे दिविषदो वैकुण्ठदासा अस्मदीया अस्मत्स्थानं प्रविशतेति वैकुण्ठामरा मुनयश्च विस्मिता अभवन् वैकुण्ठप्रवेशो भूमिस्थानां विधिः।१०।९।९।' सहस्रगीतिः, पृ. २६७
'श्रीमद्वैकुण्ठैश्वर्यादि-दिव्यलोकम्...' गद्यत्रयम् (वैकुण्ठगद्यम्).

[३६] वचनामृतम्, गढडाप्रथमप्रकरणम् २१.
नास्त्यपरः परो लोको ह्यस्माद्ध्यक्षरधामतः। यतो विराजते नित्यमत्र पराऽक्षरात् परः॥५८॥
सकलेष्वपि वेदेषु यतिभिः ऋषिभिस्तथा। चर्यां ब्रह्मणि वाञ्छिद्भिरक्षरधाम कीर्तितम्॥५९॥
(स्वामिनारायणसिद्धान्तसुधा, पृ. ६८,७२)

श्रीमद्भगवद्गीतायाः अष्टमाऽध्यायस्य मुलश्लोकान् समधीत्य इदं ज्ञायते यत् पदधामस्थानब्रह्माक्षरेति पञ्चशब्दाः किमपि एकतत्त्वं निर्दिशन्ति निष्कर्षयन्ति वा। एतदध्यायोपरि लिखितानां द्वैतविशिष्टाद्वैतस्वामिनारायणभाष्याणाम् अध्ययनं कृत्वा अस्माभिः ज्ञायते यत् स्वामिनारायणभाष्यमेव अत्यन्तनिकटार्थवर्ति, येन शुद्धस्फुटार्थः प्रदत्तः। तस्य एकं कारणं एतद्दर्शने स्वीकृतानि पञ्चतत्वानि स्युः। अद्वैतदर्शने केवलम् एकं ब्रह्मतत्वं[३७] स्वीकृतम्। विशिष्टाद्वैतदर्शने जीवमायापरब्रह्मेति[३८] त्रीणि तत्त्वानि स्वीकृतानि। अतः एतदुभययोः दर्शनभाष्ययोः क्व समानप्रकरणे एव षड्लिङ्गप्रणालीं त्यक्त्वा अर्थीकरणस्य प्रक्रिया दृश्यते । अत्र अक्षरपुरुषोत्तमदर्शने जीवेश्वरमायाऽक्षरब्रह्मपरब्रह्मेति[३९] पञ्च तत्त्वानि स्वीकृतानि। अतः दर्शनमिदं मूलार्थान् संलग्नं स्थित्वापि सिद्धान्ते न कोऽपि हानिः। अत्रैतदवधेयं यद् तत्त्वतः सर्वाणि भाष्याणि स्वदर्शननिष्ठसिद्धन्तानुसारेण सुयोग्यानि एव किन्तु शास्त्रानुशीलपद्धतेः दृष्ट्या गीतायाः अष्टमाध्यायस्योपरि लिखितानि त्रीणि भाष्याणि अधीय एतादृशं प्रतीयते यत् स्वामिनारायणभाष्यं मूलग्रन्थस्य विचारैः सह अधिकतमं सुसङ्गतम्।

## सन्दर्थग्रन्थाः

१. आदि देवानन्दस्वामी, श्रीरामानुजभाष्यम्(मयलापुर, चेन्नई: अध्यक्ष श्रीरामकृष्ण मठ)

२. भगवान् स्वामिनारायणः, वचनामृतम्, संस्करणम् २९ (स्वामिनारायण अक्षरपीठ शाहीबाग, अहमदावाद,१९५४)

३. पिल्लै लोकाचार्यस्वामी, तत्त्वत्रयम् ( व्याख्याकारः शिवप्रसादः द्विवेदी [श्रीधराचार्यः]), (विश्वविद्यालय प्रकाशन केन्द्रम्, बाराबंकी- फैजावाद)

४. महन्तस्वामिमहाराजः, सत्सङ्गदीक्षा, प्रथमं मुद्रणं (स्वामिनारायण अक्षरपीठ, शाहीबाग, अहमदावाद,२०२०)

५. शङ्कराचार्यः, विवेकचूडामणिः. संस्करणम् २० (गोविन्दभवन कार्यालय, गीताप्रेस, गोरखपुरम्, सं २०४०)

---

[३७] 'ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः। सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः॥२०॥ (विवेकचूडामणिः, पृ. २०)

[३८] 'तत्त्वत्रयं नाम चिदचिदीश्वरश्च ।', (तत्त्वत्रयम्, पृ. ५)

[३९] जीवस्तथेश्वरो माया ब्रह्माक्षरं तथा । परब्रह्मेति तत्त्वानि भिन्नानि पञ्च सर्वदा॥१०२॥ (सत्सङ्गदीक्षा, पृ. २३)

६. श्रीशठकोपः स्वामी, सहस्रगीतिः, (संस्कृतानुवादकः- गोवर्धनः रङ्गाचार्यः सूरि [खेमराजश्रीकृष्णदासः श्रीवेंकटेश्वरः स्टीम् प्रेस], मुम्बापुरी, सं १९७०)

७. श्रीहरिकृष्ण गोयंदका, श्रीमद्भगवद्गीता(शाङ्करभाष्य हिन्दी अनुवाद), २६तम मुद्रणम्, (गोरखपुरम्: गीताप्रेस,२०१७)

८. रामानुजाचार्यः, गद्यत्रयम् (वैकुण्ठगद्यम्).

९. स्वामी भद्रेशदासः, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, प्रथम मुद्रण (स्वामिनारायण अक्षरपीठ शाहीबाग, अहमदावाद,२०१२)

१०. स्वामी भद्रेशदासः, स्वामिनारयणसिद्धान्तसुधा, प्रथम मुद्रणम्, (स्वामिनारायण अक्षरपीठ शाहीबाग, अहमदावाद,२०१७)